

# ॥ श्रीसावित्री अष्टोत्तर-शत-नाम स्तोत्रम् ॥

## Sri Savitri Ashtottara Shata Nama Stotram

The following is a rare 108 names on **Goddess Savitri**. The source of this hymn is not known. The brief **Phalashruti** mentions that one who chants this hymn long life, comforts, progeny, victory, and good demeanor.

भूतिदा भुवना वाणी महावसुमती मही ।
हिरण्य-जननी नन्दा सविसर्गा तपस्विनी ॥ १ ॥

यशस्विनी सती सत्या वेदविच् चिन्मयी शुभा ।
विश्वा तुर्या वरेण्या च निसृणी यमुना भुवा ॥ २ ॥

मोदा देवी वरिष्ठा च धीश्-च शान्तिर् मतिर् मही ।
धिषणा योगिनी युक्ता नदी प्रज्ञा प्रचोदिनी ॥ ३ ॥

दया च यामिनी पद्मा रोहिणी रमणी मया ।
सेनामुखी साममयी बगला दोष-वर्जिता ॥ ४ ॥

माया प्रिया परा दोग्ध्री मानिनी पोषिणी क्रिया ।
ज्योत्स्ना तीर्थमयी रम्या सौम्या ऽमृतमयी तथा ॥ ५ ॥

ब्राह्मी हैमी भुजङ्गी च विशिनी सुन्दरी वनी ।
ओंकार-हंसिनी सर्वा सुधा सा षड्-गुणावती ॥ ६ ॥

मन्त्रात्मिका रमा तन्वी रिपुघ्नी रक्षिणी सती ।
कला तारा विधुगतिर् विषघ्नी च वरानना ॥ ७ ॥

अमरा तीर्थदा दीक्षा दुर्धर्षा रोग-हारिणी ।
नाना-पाप-नृशंसघ्नी षट्पदी वज्रिणी रणी ॥ ८ ॥

योगिनी विमला साङ्ख्या अबला बल-विक्रमा ।
गोमती जाह्नवी रज्वी तपनी जातवेदसा ॥ ९ ॥

अचिरा वृष्टिदा ज्ञेया ऋत-तन्त्रा ऋतात्मिका ।
सर्व-कामदुघा सौम्या भवा ऽहङ्कार-वर्जिता ॥ १० ॥

द्विपदा या चतुष्पदा त्रिपदा या च षट्पदा ।
अष्टापदी नवपदी सहस्राक्षा ऽक्षरात्मिका ॥ ११ ॥

॥ फलश्रुतिः ॥

अष्टोत्तर-शतं नम्ना सावित्र्या यः पठेन् नरः ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥ १२ ॥

---

॥ इति श्रीसावित्री अष्टोत्तर-शत-नाम स्तोत्रं सम्पूर्णम् ॥